पत्नदृश्चिकः। विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा। वाह्यकी पिच्चिटः कुम्भी वर्च्चःकीटोऽरिमेदकः। पद्मकीटो दुन्दुभिको मकरः शतपादकः। पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी। क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः। एते ह्यग्निप्रकृतयश्चतुर्विंशः प्रकीर्त्तिताः। तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः। विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः। सैरेयकः प्रचलको बलभः किटिभस्तथा। सूचीमुखः कृष्णगोधा यश्च काषायवासिकः। कीटगर्द्दभकश्चैव तथा त्रोटक एव च। त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः। तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः। तुङ्गीनासो विचिलकस्तालको वाहकस्तथा। कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः। तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा। अग्निकीटश्च घोराः स्युर्द्वादश प्राणनाशनाः। तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्। तास्ताश्च वेदनास्तीव्रारोगा वै साम्निपातिकाः। क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः। ज्वराङ्गमर्द्दरोमाञ्चवेदनाभिः समन्वितः। छर्द्द्यतीसारतृष्णा च दाहो मोहोविजृम्भिका। वेपथुश्वासहिक्काश्च दाहः शीतञ्च दारुणम्। पिडकोपचयः शोफो ग्रन्थयो मण्डलानि च। दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च। तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः। येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत्। दूषीविषप्रकोपाच्च तथैव विषलेपनात्। लिङ्गं तीक्ष्णविषेष्वेतच्छृणु मन्दविषेष्वतः। प्रसेकोऽरोचकश्छर्द्दिःशिरोगौरवशीतता। पिडकाकोठकण्डूनां जन्म दोषविभागतः। योगैश्चानाविधैरेषां चूर्णानि गरमादिशेत्। दूषीविषप्रकाराणां तथैवाप्यनुलेपनात्। एकजातीनतस्तूर्द्ध्वं कीटान् वच्यामि भेदतः। सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च। त्रिकण्टकः कुणी चापि हस्तिकच्चोऽपराजितः। चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः। तैर्दष्टस्य श्वयथुरङ्गमर्दो गुरुता गात्राणां दंशःकृष्णश्च भवति। प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः। तथा निरुपमश्चापि पञ्च गौधेरकाः स्मृताः। तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्। रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः। गलगोली श्वेतकृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिका इत्येवं षट् ताभिर्दष्टे सर्षपिकावर्ज्जं दाहशोफक्लेदा भवन्ति। सर्षपिकया हृदयपीडातिसारश्च। शतपद्यस्तु परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे शोफो वेदना दाहश्च हृदये श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिडकोत्पत्तिश्च। मण्डूकाः कृष्णः सारः कुहको हरितो रक्तो यववर्णाभो भ्रुकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशकण्डूर्भवति पीतफेनागमश्च वक्त्रात्। भ्रुकुटीकोटिकाभ्यामेतदेव दाहश्छर्दिर्मूर्च्छा चातितिमात्रम्। विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिडकाभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति। अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च। कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारज्वरादिभिरभिहन्यते। सूकदृन्तादिभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते सूकञ्चात्र लच्यते। पिपीलिकाः स्थूलशीर्षा संवाहिका ब्राह्मणिकाङ्गुलिका कपिलिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः। मक्षिकाः कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः। स्थालिका काषायीभ्यामेतदेव पिडकाश्च सोपद्रवा भवन्ति। मशकाः सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च पार्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः। नखावकृष्टेऽत्यर्थं पिडकाः सदाहपाकाभवन्ति। जलौकसां दष्टलक्षणमुक्तं चिकित्सितञ्च। भवन्ति चात्र। गौधेरकःस्थालिका च ये च श्वेताग्निसंप्रभे। भ्रुकुटीकोटिकश्चैव न सिध्यन्त्येकजातिषु। शवमूत्रपुरीषैस्तु सविषैरवमर्षणात्। स्युः करटदाहकोठारुः पिडकातोदवेदनाः। प्रक्लेदवांस्तथास्रावो भृशं सम्याचयेत्त्वचम्। दिग्धविद्धक्रियास्तत्र यथावदवचारयेत्। नावसन्नं नचोत्सन्नमतिसंरम्भवेदनम्। दंशादौ विपरीतार्च्चि कीटदष्टं सुबाधकम्। कीटैर्दष्टानुग्रविषैः सर्पवत् समुपाचरेत्। त्रिविधानान्तु सर्पाणां त्रैविध्येन क्रिया हिता। स्वेदमालेपनं सेकं चोष्णमत्रावचारयेत्। अन्यत्र मूर्च्छिताद्दंशात् पाककोथप्रपीडितात्। विषघ्नञ्च विधिं सर्वं कुर्य्यात् संशोधनानि च”। २कीटाख्येषु राशिषु

**कीटगर्द्दभक** पु० कीटभेदे कीटशब्दे विवृतिः।

**कीटघ्न** पु० कीटं हन्ति हन–टक्। गन्धके राजनि०।

**कीटजा** स्त्री० कीटेभ्यो जायते जन–ड। १जतुनि लाक्षायाम् रत्नमाला० २कीटजातमात्रे त्रि०।[हंसपदीवृक्षे राजनि०।

**कीटपादिका** स्त्री कीटाःपादे मूलेऽस्याः कप् अतइत्त्वम्।